अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BC-203**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**

**सहायक पाठ्यक्रमः (सत्रम् : द्वितीयम्)**

**तृतीयपत्रम्-संस्कृतसाहित्यम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**अवधेयम्** : इदं प्रश्नपत्रम् सप्ततेः (70) अङ्कानां विद्यते। अत्र खण्डद्वयं वर्त्तते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

**(खण्डः – अ)** **50 अङ्काः**

**(नीतिशकतम्)**

**प्रश्नः1– त्रिषु श्लोकेषु द्वयोः पूर्तिः करणीयः** **(2X2.5=05)**

(क) लोभश्चेदगुणेन किं ....................................।।
(ख) ................. मा ब्रूहि दीनं वचः।।
(ग) साहित्यसङ्गीतकलाविहीनः .........................।।

**प्रश्नः2– त्रिषु श्लोकेषु द्वयोः व्याख्यां कुर्वन्तु –** **(2X2.5=05)**

(क) शिरः शार्वं स्वर्गात् पशुपतिशिरस्तः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।
अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः।।

(ख) पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षमिदं प्रवदन्ति सन्तः।।

(ग) ऐश्वर्यस्य विभूषणं स्रजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वितस्य पात्रे व्ययः।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्।।

**प्रश्नः3– संस्कृतभाषायामनुवादः करणीयः –** **(10X1=10)**

(1) वह पक्षियों को गिनता है।
(2) कुछ छात्र परीक्षा में उत्तीर्ण होते है और कुछ अनुत्तीण।
(3) मैं इस कार्य के लिये समर्थ हूँ।
(4) राम अग्नि में हवन करता है।
(5) नदी के तट पर रेत और कीचड़ है।
(6) गरु के जाने पर शिष्य आया।
(7) एकान्त में भी पाप न करो।
(8) तुम दोनों और हम दोनों विद्यालय जाते हैं।
(9) गुरु शिष्य पर अनुग्रह करता है।
(10) सारी पुस्तकों में मुझे गीता प्रिय है।

**प्रश्नः4– कयोश्चिर द्वयोः शब्दरूपलेखनम् –** **(2X5=10)**

(क) आत्मन् । (ख) शर्मन् । (ग) वधू ।

**प्रश्नः5– कयोश्चिद् द्वयोः धातुरूपलेखनम् –** **(2X5=10)**

(क) आस् (लिट्) । (ख) सु (लुङ्) । (ग) ग्रह् ( लोट्) आत्मनेपदम् ।

**प्रश्नः6– दशशब्दाम् अर्थाः लेखनीयाः –** **(10X1=10)**

यज्वन्, उक्षन्, समितिः, चञ्चुः, दर्दुरः, सानु, वृत्तिः, सौधम्, सिता, दन्तिन्, केयूरम्, प्रशस्यः।

***अथवा***

**द्वयोर्मध्य एकस्य निबन्धलेखनम् –**

(अ) संघे शक्तिः कलियुगे (ब) अहिंसा परमोधर्मः

## (खण्डः – ब) 20 अङ्काः

## (अभिनवपाठवलिः)

**प्रश्नः7– स्वनिर्मिता कथा लेखनीया –** **(10)**

**प्रश्नः8– एतेषां शब्दानामर्था लेखितव्याः –** **(10)**

विपश्चिद्, वेधनीम्, दैवात्, शाखामृगः, गलिताङ्गः क्रकचम्, मारात्मके त्वयि, शार्दूलः, दूरमपसर, नागः

***अथवा***

**अपठितगद्यस्य आर्यभाषायामनुवादः करणीय –**

वेदप्रतिपादितो धर्मो वैदिकधर्मः। वैदिकधर्मे ईश्वरः अजरः, अमरः, शुद्धः, व्यापकः, सर्वशक्तिमान्, जगन्नियन्ता, सर्वज्ञः, न्यायशीलः सृष्टि–स्थिति–प्रलयकर्ता च। मोक्षानन्दः सत्येन, तपसा, श्रद्धया तथा चाध्यात्मिकज्योतिष्प्रदीप्त्या एव सम्भवः। वेदेऽखिलमेव विश्वं राष्ट्रत्वेनाभिमतम्। त्वादृशराष्ट्रस्य राजा तादृशो भवेत् यं सर्वाः प्रजाः वाञ्छेयुः। वेदे गोमांस–मनुष्यमांस–अश्वादिमांसभक्षणस्य निषेधः। पुरुषाश्वादिमांसभक्षयितुः शिरश्छेदो दण्डरूपेण विहितः। ऋग्वेदस्य दशममण्डले "अक्षाख्य द्यूतक्रीडायाः" निन्दा निषेधश्चोपदिष्टः। ईश्वरः आचष्टे द्यूतं मा कुरु। कृषिमेव कृषस्व, तत्सम्पादिते धने रतिं कुरु। द्यूते पराजितस्य का दशा भवति? कितवस्य भार्या तप्यते। मातापि संतप्ता भवति। अक्षपराजयात् ऋणवान् कितवः भयमापन्नः कस्यचिद् धनिनः गृहे रात्रौ चौर्यमुपगच्छति, इति कीदृशः स शोच्यः। एवं विधाः जनकव्याणकारिण उपदेशाः परामर्शश्च वेदेषु निर्दिष्टाः सन्ति।

---------------x---------------